॥ नारायणबलिपद्धति.
19 पत्र

1316

11"x5"

गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं निर्दिष्टं पंचगव्यं च पवित्रं कायशोधनं १

॥नारायणवलिपद्धतिपत्रसं १८॥

स्वस्त्ययनं पठेत् २   फ॰ ४   पवित्रधारणं २ पंचगव्यासनं २

ना॰ श्रीगणेशाय नमः॥ अथ नारायणबलिर्लिख्यते॥ जपसंख्या सपादलक्ष
१ अभावे १०००० अयुतं गायत्रीजपसंख्या॥ आचम्य प्राणायामं कृत्वा प्र
थमं वेदपाठकान् ब्राह्मणान् निमन्त्रयेत् गणेशादिपूजनं अद्यामुकमा
सेऽहममुकशर्मा अमुकगोत्रस्य पितुरमुकप्रेतस्य प्रे[illegible]विमुक्तिपूर्वका
मयस्वर्गलोकफलकामश्चतुष्पादिदुर्मरणजनितपंक्तिं चिदपमृत्यु
जनितदोषोपशान्त्यर्थं करिष्यमाणनारायणबलिकर्मणि गायत्रीजप
ब्रह्मादिपञ्चप्रधानदेवतानिर्विघ्नतासिद्ध्यर्थं गणेशादिपूजनं यथोपचा
रेणाहं करिष्ये॥ गणपतये नमः॥ पाद्यार्घ्यगन्धाक्षतपुष्पधूपदीपनैवेद्यतां
बूलपूगफलदक्षिणाद्रव्यं समर्पयामि॥ अथ ब्राह्मणवरणसंकल्पः॥ १

फ॰१

ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यप्रेत॰अक्षयस्वर्गलोककामश्चतुष्ष
ष्टिदुर्मरणनरगतपातित्यचिदपमृत्युदोषनिवारणार्थं करिष्यमाणना
रायणबल्यंगत्वेन यथासंख्याकगायत्रीजपकरणार्थं तथा च ब्रह्मविष्णु
रुद्रयमप्रेतानां स्वैस्वैर्मन्त्रैर्यथासंख्यापरिमितजपकरणार्थमेभिर्गन्धाक्षत
पुष्पताम्बूलपूगफलदक्षिणाभिरमुकगोत्रानमुकशर्मणो ब्राह्म
णान्युष्मानहं वृणे वृतास्म इति प्रतिवचनम् जपानन्तरं पश्चान्नघा
दिलीरंगामनं कृत्वा तद्देशे मंडलादिकं कृत्वा सौवर्णीका त्यो विष्णुं ब्रह्माणं
रूप्यकं तथा रुद्रं ताम्रमयं कुर्यात् यमं लोहमयं तथा प्रेतं सीसमयं
कुर्यान्मात्रं च मरणमेषं तथा कौसुमं च यवान्संत पूगफलं मंडलाक्षते

ना॰ नमंडलंपरिवर्त्तनं [illegible] सस्था [illegible] कीं [illegible] स्थापयेत् [illegible]

२ [illegible] [illegible] केन [illegible] सर्वं [illegible] सुगंध [illegible]

[illegible] तपत

कि [illegible] [illegible] नवे न

[illegible] क पात्रा [illegible] [illegible] दिशादि

कपाल [illegible] सूक्ष्म [illegible] गृहदेवा [illegible] पृथ्वी प

[illegible] रेणापजन्महकपिबा [illegible] रिद्धाः इकलशग्रपंचधान्यसमर्पयेत् गो

धूम [illegible] लोमुद्रामाषासितला यनुक्रमात प्रथमत्रप्रमाणांच्चदेवतानां समर्प

येत १ पूर्वे ब्रह्मकलशं गोधूमोपरि संस्थाप्य पश्चिमे विष्णुकलशं तंडुलोपरि सं २

स्थाप्य । तत्र रुद्रकलशं मण्डलोपरि संस्थाप्य दक्षिणे यमकलशं तिलोपरि संस्था
प्य मध्ये प्रेतकलशं तिलोपरि संस्थाप्य अथ संकल्पः ॐ अद्यामुकगोत्रस्य
पितुरमुकप्रेतस्य देहोद्धरणकामनयाग्नदुःखाद्विष्णुलोकगमनकामस्त्रिविष्टपमनुज
निमदोषनिवारणार्थं नारायणबलिं महं करिष्ये ॐ ब्रह्म यज्ञानं प्रथ
मं पुरस्ताद्वि सीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च यो
निमसतश्च विवः इति ब्रह्माणमावाहयामि ॐ इदं विष्णुर्विचक्रमे त्रे
धा निदधे पदम् समूढमस्य पांसुरे इति विष्णुमावाहयामि ॐ नमस्ते
रुद्र मन्यव उतोत इषवे नमः बाहुभ्यामुत ते नमः इति रुद्रमावाहयामि
ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथि

ना० ५

मंत्रः ॐ युक्तेन मनसा वयं देवस्य सवितुः सर्वे स्वग्र्याय शक्त्या १ इति मंत्रेण
वाहनं स्थापयेत् पूर्वदिशि कलशं दुग्धजलेन पूरितं ॐ प्रजापते न त्व
देवान्यन्यो विश्वा रूपाणि परिता बभूव यत्कामास्ते जुहुमस्तन्नोऽस्तु वय
म् मुष्यतासावस्य पितावयं स्याम पतयो रयीणां स्वाहा इति कल
शं संस्थाप्य ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः सु
बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः श्वेत वस्त्रेण संवे
ष्टय कलशोपरि संस्थाप्य संपूज्य ॐ ब्रह्मणस्पते त्वमस्य जेता सूक्तस्य
बोधितं न यं च जिन्वः विश्वं तं द्भद्रं यदवंति देवा बृहद्वदेम विदथे सु
वीराः इदं ब्रह्मा विश्वाविश्वकर्मा यो नः पिता न्नपते न्नस्य नो धेहि इ ५

तिपठित्वागंधादिनाभ्यर्च्चयेत् अथस्वर्णमयीं विष्णुप्रतिमां पूजयेत्
स्नापयेत् ॐ इदं विष्णुर्विचक्रमे त्रेधानिदधे पदं समूढमस्यपांशु
रे इति मंत्रेण स्नातां पश्चिमदिशि गंगोदकेन पूरयित्वा तस्यो
परि पीतवस्त्रेण संवेष्ट्य संस्थाप्य ॐ अग्न आयाहि वीतये गृणानो
हव्यदातये निहोतासत्सि बर्हिषि इति पठित्वा गंधादिनाभ्यर्च्य उत्त
रदिशं ताम्रप्रतिमां रुद्रं पूजयेत् ॐ इमा रुद्राय तवसे कपर्द्दिने क्ष
यद्वीराय प्रभरामहे मतीः यथासमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रा
मे अस्मिन्ननातुरं इति मंत्रेण स्नापयित्वा रक्तवस्त्रेण संवेष्ट्य उत्त
३१ रदिशं नमस्ते रुद्र मन्यव उतो त इषवे नमः बाहुभ्यामुत ते नमः मधु

घृतेन कलशं पूरयित्वा तस्योपरि स्थापयित्वा पूजादिकं कुर्यात् दक्षि
णे लोहप्रतिमां यमं संपूज्य ॐ ये समानाः सुमनसः पितरो यमराज्ये
तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतामिति स्नानं कलशे जलेन घृतं
दक्षिणदिशं संस्थाप्य ॐ यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे देव वस्त्वा
सविता मध्वानक्तु पृथिव्याः स्पृशस्पाहि अर्चिरसि शोचिरसि तपोसि कृष्ण
वस्त्रेण संवेष्ट्य पूजयेत् ॐ यमाय त्वा अङ्गिरस्वते पितृमते स्वाहा धर्मपि
स्वाहा धर्मपित्रे दक्षिणादिक कलशोपरि संस्थाप्य पूजादिकं कुर्यात् प्रे
तस्त्रपुमयः शुभ्रो यद्वा लोहमयस्ततः यद्वा कुशमयो वास्वेतस्याप्याचैव
पृथक् पृथक् १ तन्मध्ये कौशिकं नरः सीसकं ॥ ॐ ये समाना सुमनसो

जीवाजीवेषु मामकाः तेषां थं श्रीर्मयि कल्पतामस्मिंल्लोके शतं थं समा
स्नानं कारयित्वा स्थापयेत् इति मंत्रेण प्रेतप्रेतप्रतिमां सीसमयीं कुश
वस्त्रेण संवेष्ट्य स्त्रीचेत् रक्तवस्त्रोपरि संस्थाप्य दक्षिणाभिमुखोपस
व्येन तर्पयेत् सव्येन संकल्पः अद्येत्यादि अमुकगोत्रस्य पितुरमुक
प्रेतस्य देहोद्धरणकामो नारायणवल्यंगत्वेन विष्णुतर्पणमहं करि
ष्ये ॐ युंजते मन उत युंजते धियो विप्रा विप्रस्य वृहतो विपश्चितः वि
विहोता दधे वयुनाविदेक इन्मही देवस्य सवितुः परिष्टुतिः १ जलांज
लिं जले त्रयं दद्यात् ॐ देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासं न
देवयजने पृथिव्याः मखाय त्वा शीर्ष्णे २ जलांजलिं जले दद्यात् ॐ
त्रयं

ना० ६ इन्द्रस्योजस्थमखस्यवोद्यशिरोराध्यासन्देवयजनेपृथिव्याःमखापत्वा
मखस्यत्वाशीर्ष्णे जलांजलिन्त्रयंजलनेद्द्यात् ॐ इयत्यग्रआसीन्मखस्य
वोद्यशिरोराध्यासन्देवयजनेपृथिव्यामखायत्वामखस्यत्वाशीर्ष्णे ४ ॐ
प्रैतुब्रह्मणस्पतिःप्रदेव्येतुसूनृताःअच्छावीरंनर्यपंक्तिराधसन्देवायज्ञंनेयं
यंतुनःमखायत्वामखस्यत्वाशीर्ष्णेमखस्यशिरोसिमखायत्वामखस्यत्वाशी
र्ष्णेमखशिरोसिमखायत्वामखस्यत्वाशीर्ष्णे जलांज० ३ ॐ अश्वस्यत्वावृष्णःशक्ना
देवयज नेपृथि व्या धूपयामिमखायत्वामखस्यत्वाशीर्ष्णे ॐ अश्वस्यत्वावृष्णःशक्नाधूपयामिदेवय
जनेपृथिव्यामखायत्वामखस्यत्वाशीर्ष्णे ॐ अश्वस्यत्वावृष्णःशक्नाधूपयामिदेवय
जनेपृथिव्यामखायत्वामखस्यत्वाशीर्ष्णे २ जलांज० ॐ दिविविष्णुर्व्यक्रंस्तजागतेन ७

ष्टंदसा न तमो निर्भक्तो योस्मान्द्वेष्टि यं च वयं द्विष्मोंतरिक्षे त्रिष्टुभ्यं कथं त्रैष्टुभेन छं
दसा न तमो निर्भक्तो योस्मान्द्वेष्टि यं च वयं द्विष्मोऽस्मादन्नादस्यै प्रतिष्ठाया अगन्म स्वः सं
ज्योतिषाभूम: ४ जलांजलित्रयं दद्यात ॐ अग्नेस्तनूरसि विष्णवेत्वा सोमस्यत
नूरसि विष्णवेत्वातिथेरातिथ्यमसि विष्णवेत्वा श्येनाय त्वा सोमभृते विष्णवेत्वाग्न
येत्वा रायस्पोषदे विष्णवेत्वा ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे इन्द्रस्य
युज्यः सखा जलांजलित्रयं दं ॐ त्रीणि विपदा विचक्रमे त्रेधा निदधे पदं समू
ढमस्य पांसुरे ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः स
बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॐ यमाय त्वा मखाय
त्वा सूर्यस्य त्वा तपसे देवस्त्वा सविता मध्वानक्तु पृथिव्याः संस्पृशस्पाहि अ
र्चिरसि शोचिरसि तपोसि ॐ ये समानाः सुमनसो पितरो यमराज्ये तेषां लोकः
स्वधा नमो यज्ञो देवेषु कल्पतां अथ रुद्राध्यायः ॐ नमस्ते रुद्र मन्यव उतो त इष

तो असौ यस्ताम्रो अरुण उत बभ्रुः सुमंगलः ये चेनं रुद्रा
अभितो दिक्षु श्रिताः सहस्रशोवैषां हेड ईमहे ६

ना८ बेनमः बाहुभ्यामुत ते नमः १ याते रुद्र शिवा तनूरघोरापापकाशिनी तया नस्त
न्वा शंतमया गिरि शंताभिचाकशीहि २ यामिषुं गिरिशंत हस्ते बिभर्ष्यस्तवे शि
वां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ३ शिवेन वचसा त्वा गिरिशाच्छा वदाम
सि यथा नः सर्वमिज्जगदयक्ष्मं सुमना असत् अध्यवोचदधिवक्ता प्रथमो दैव्यो
भिषक् अहींश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्योधराचीः परासुवः ५ असौ योवसर्प
ति नीलग्रीवो विलोहितः उतैनं गोपा अदृशन्नदृशन्नुदहार्यः स दृष्टो मृडयाति नः ७ न
मोस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे अथो ये अस्य सत्वानोहं तेभ्योकरं नमः ८ प्र
मुञ्च धन्वनोस्त्वमुभयोरार्त्न्योर्ज्याम् याश्च ते हस्त इषवः परा ता भगवो वप ९ विज्यं
धनुः कपर्दिनो विशल्यो बाणवाँ उत अनेशन्नस्य या इषव आभुरस्य निषंगधिः १०
या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः तयास्मान् विश्वतस्त्वमयक्ष्मया परिभुजः ११ परि
ते धन्वनो हेतिरस्मान् वृणक्तु विश्वतः अथो य इषुधिस्तवारे अस्मिन्निधेहि तं १२ अव
तत्य धनुष्ट्वं सहस्राक्ष शतेषुधे निशीर्य शल्यानां मुखा शिवो नः सुमना भव १३ न ८

मस्तआयुधायानातताय धृष्णवेउभाभ्यामुत ते नमो बाहुभ्यां तव धन्वने १४ मानोम
हान्तमुत मानोऽअर्भकं मान उक्षन्तमुत मानोउक्षितं मानो वधीः पितरं मोत मातरं मानः
प्रियास्तन्वोरुद्ररीरिषः १५ मानस्तोके तनये मानआयुषि मानोगोषु मानोअश्वेषुरीरिषः मानो
वीरांनुद्र भामिनोवधीर्हविष्मंतः सदमित्वाहवामहे १६ इतिरुद्रतर्पणम् अथविभ्राड ॐ
विभ्राडबृहत्पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतं वातजूतो अभिरक्षत्मानप्र ति ५
जाःपुपोषपुरुधाविराजति १ ॐ उदुत्यंजातवेदसं देवं वहंति केतवः दृशे विश्वाय सूर्यं २
येनापावकचक्षसाभुरण्यंतं जनाँ अनुत्वं वरुणपश्यसि ३ दैव्यावध्वर्यूआगतंरथे
नसूर्यत्वचामध्वायज्ञंसमंजाथे तं प्रत्नथायं वेनश्चित्रंदेवानां तंप्रत्नथापूर्वथाविश्वथे
मथाज्येष्ठतातिं बर्हिषदं स्वर्विदंप्रतीचीनं वृजनं दोहसे धुनिमाशुंजयंतमनुयासुवर्द्धसे ५
अयंवेनश्चोदयत्पृश्निगर्भाज्योतिर्जरायूरजसोविमाने इममपांसंगमेसूर्यस्य शिशुं
नविप्रामतिभीरिहंति ६ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः आप्राद्यावापृ
थिवी अंतरिक्षं सूर्यआत्माजगतस्तस्थुषश्च ७ आनइडाभिर्विदथेसुशस्ति विश्वा

ना॰ ८

नरःसवितादेवअस्तु अपिपथायुवानोमत्सथानोविश्वंजगदभिपित्वेमनीषा ८ यदद्यकच्च
वृत्रहन्नुदगा अभिसूर्यसर्वंतदिन्द्रतेवशेतरणीर्विश्वदर्शतोज्योतिष्कृदसिसूर्यविश्वमाभा
सिरोचनंतत्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्विततंसंजभारयदेदयुक्तहरितःसधस्था
दाद्रात्रीवासस्तनुतेसिमस्मैतन्मित्रस्यवरुणस्याभिचक्षेसूर्योरूपंकृणुतेद्योरुपस्थेअनन्
तमन्यद्रुशदस्यपाजःकृष्णमन्यद्धरितःसंभरन्ति बण्महाँअसिसूर्यबडादित्यमहाँअसि
महस्तेसतोमहिमापनस्यतेद्धादेवमहाँअसि १३ बट्सूर्यश्रवसामहाँअसिस
त्रादेवमहाँअसिमह्नादेवानामसुर्यःपुरोहितोविभुज्योतिरदाभ्यं १४ आयन्तइवसूर्यंवि
श्वेदिन्द्रस्यभक्षतवसूनिजातोजनमानओजसाप्रतिभागंनदीधिम १५ अद्यादेवा
उदितःसूर्यस्यनिरंहसःपिपृतानिरवद्यात् तन्नोवरुणोमामहन्तामदितिःसि
न्धुःपृथिवीउतद्यौः १६ आकृष्णेनरजसावर्तमानोनिवेशयन्नमृतंमर्त्यंचहिरण्ययेन
सवितारथेनदेवोयातिभुवनानिपश्यन् अपसव्येनप्रेतंमनसाध्यात्वापुरुषसूक्तेन ८

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स भूमिꣳ सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलं १ पुरुष
एवेदꣳ सर्वं यद्भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति २ एतावानस्य महिमातो
ज्यायाꣳश्च पूरुषः पादोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ३ त्रिपादूर्ध्व उदैत्पुरुषः पादो
स्येहाभवत्पुनः ततो विष्वङ् व्यक्रामत्साशनानशने अभि ४ ततो विराडजायत विराजो अधि पू
रुषः स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ५ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं पशू
ꣳस्ताꣳश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ६ तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि यज्ञिरे तस्माद्यजुः
स्तस्मादजायत तस्मादश्वा अजायन्त ये के चोभयादतः गावो ह यज्ञिरे तस्मात्तस्माज्जाता अजा
वयः ८ तं यज्ञं बर्हिषि प्रौक्षन्पुरुषं जातमग्रतः तेन देवा अयजन्त साध्या ऋषयश्च ये ९
यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते १० ब्राह्मणोस्य
मुखमासीद्बाहू राजन्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्याꣳ शूद्रो अजायत ११ चन्द्रमा मनसो जा
तश्चक्षोः सूर्यो अजायत श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत १२ नाभ्या आसीदन्त
रिक्षꣳ शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाꣳ अकल्पयन् १३ यत्पु

ना.१० रुषेण हविषा देवा यज्ञमतन्वत वसंतोस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः १४ सप्तास्या
सन् परिधयस्त्रिः सप्त समिधः कृताः देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुं १५ यज्ञेन
यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचंत यत्र पूर्वे सा
ध्याः संति देवाः १६ सव्येन प्रार्थनां कुर्यात् अतसीपुष्पसंकाशं पीतवाससं जनार्दनम्
ये नमस्यंति गोविंदं न तेषां विद्यते भयं १ अनादिनिधनो देवः शंखचक्रगदाधरः अ
क्षयः पुंडरीकाक्षः प्रेतमुक्तिप्रदो भव २ तर्पणस्यावसाने तु गां च दद्यात् पयस्विनि
ॐ अद्य कृतैतद्विष्णुतर्पणसांगतासिद्ध्यर्थं गोदानजन्यफलप्राप्तिकामो गोसंवधि
नीं दक्षिणां चंद्रदैवतां तन्मौल्योपकल्पितां यथानामगोत्राय ब्राह्मणाय तुभ्यमहं ५८
संप्रददे आमान्नसंकल्पः अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहोद्धरणकामो
नारायणवल्लभत्वेन क्षुधादिदोषनिवारणार्थं सेटकपरिमितं आमान्नं यथानाम
गोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे ॥ अथ कुशकंडिका ॥ परिसमूह्य त्रीन् कु १०

अस्मिन्कर्मणि होमकाले स्थानमन्तर्मुख यथा कुण्डस्य पूर्वे दिग्भागे काली जिह्वा प्रकीर्तिता। आज्यविट नाम्ना गिन भावाद्य। प्रायश्चित्ते विश्वेदेव इति प्रमाणात्
प्रवेजा सर्वकार्येषु शान्ते॥ अन्य सम्पूर्ण हवन कार्य में पूर्व की काली जिह्वा श्रेष्ठ कही है तिस
ते नारायणबलि में पूर्व की ही जिह्वा श्रेष्ठ है

शानेशान्यां परिस्तृत्य गोमयोदकेनोपलिप्य स्फ्येन स्रुवेण प्रागग्रं प्रादेशमात्र
मुत्तरोत्तरक्रमेण त्रिरुल्लिख्य उल्लेखनक्रमेण त्रिनामिकांगुष्ठाभ्यामुद्धृत्य जले
नाभ्युक्ष्य तत्र तूष्णीं कांस्यपात्रस्थमग्निं कोणाद्ग्निमानीय अथ वरणसंकल्पः
अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य अशौचांते द्वितीयेऽह्नि देहोद्धरणकामः अद्य कर्त
व्यनारायणबलिहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्म कर्तुं अमुकगोत्र
ममुकशर्माणमेभिर्वरणद्रव्यैस्त्वामहं वृणे इति ब्राह्मणं वरणं वृतोऽस्मीति प्र
तिवचनम् यथाविहितं कर्म कुरु करवाणीति ब्राह्मणो वदेत् ततोऽग्नेर्दक्षिणतः
शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्य अग्निं प्रदक्षिणक्रमेणानीय अ
त्र त्वं मे ब्रह्मा भव इत्यभिधाय कल्पितासने उपवेशयेत् ततः प्रणीतापात्रं पुरतः कृ
त्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः कुशोपरि नि
दध्यात् ततः परिस्तरणार्थं बर्हिषश्चतुर्थभागमादाय आग्नेयादीशानांतं ब्रह्म

ना.११ णोग्निपर्यंतं नैरृत्याद्वायव्यांतं अग्नितः प्रणीतापर्यंतं ततोग्नेरुत्तरतः पश्चि
मदिशि पवित्रच्छेदनार्थं कुशात्रयं पवित्रकरणार्थं साग्रमनंतर्गर्भं कुशपत्रद्वयं
प्रोक्षणीपात्रं आज्यस्थाली चरुस्थाली संमार्जनार्थं कुशत्रयं उपयमनार्थं वे
णीरूपकुशत्रयं दुग्धं तंडुलाः समिधस्तिस्रः स्रुवः आज्यं चरुः तिलाः षट्प
ञ्चाशदुत्तरयजमानमुष्टिशतद्वयावच्छिन्नतंडुलपूर्णपात्रं पवित्रच्छेदनकुशा
नां पूर्वपूर्वदिशि क्रमेणासादनीयं ततः पवित्रच्छेदनकुशैः पवित्रे छित्वा प्रादेश
मात्रे पवित्रे करणं ततः सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय
अनामिकांगुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा प्रणीताजलेन त्रिरुत्पवनं ततः प्रोक्ष
णीपात्रं सव्यहस्ते निधाय प्रणीतोदकेन प्रोक्षणीप्रोक्षणं ततः प्रोक्षणीजलेन
यथासादितवस्तुसेचनं ततोग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निधाय ततश्च
रुश्रपणं आज्यस्थाल्यामाज्यनिर्वापः ततोधिश्रपणं प्रणीताजलेन तंडुला ११

न प्रक्षाल्य अग्नौ रुत्तरतश्चरुं निदध्यात् आज्यं निदध्यात् ततः श्रुवः प्रत
पनमकृत्वा संमार्जनकुशानामग्रैरंतरतो मूलैर्बाह्यतः श्रुवं संमृज्य प्रणीतो
केनाभिक्ष्य पूर्ववत्प्रतप्य दक्षिकुशोपरि निदध्यात् आज्यं अग्नितश्चरोः पूर्वेणा
नीय अग्नुतो निधाय पश्चिमेन चरुमानीय आज्यस्योत्तरतो निधाय ज्वलनेना ५५
दिना हविर्वेष्टयित्वा ततः प्रोक्षणीवन्निरुत्पवनं अवेक्ष सत्सपद्रंतन्निरसनं कृत्वा
पुनः पूर्ववत् पोक्षण्युत्पवनम् तत उत्थाय उपयमनकुशानादाय वामहस्ते कृत्वा
प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ घृताक्ताः समिधस्तिस्रः क्षिपेत तत उपवि
श्य सपवित्रकरेण प्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे नि
धाय कुशेन ब्राह्मणान्वारब्धः पातितदक्षिणजानुः समिद्धतमग्नौ जुहुयात्।
तत्र प्रत्याहुति अनंतरं श्रुवावस्थितहुतशेषघृतं प्रोक्षणीपात्रे प्रक्षेपः ॐ प्र
जापतये स्वाहा इदं प्रजापतये ॐ इंद्राय स्वाहा इदमिंद्राय ॐ अग्नये स्वाहा

ना० इदमग्नये ॐ सोमायस्वाहा इदंसोमाय ॐ युञ्जतेमनउतयुञ्जतेधियोविप्राविप्र
१२ स्यबृहतोविपश्चितः विहोत्रादधेवयुनाविदेक इन्महिदेवस्यसवितुःपरिष्टुतिस्वाहा
इदंयुंजाय १ ॐ देवीद्यावापृथिवीमखस्यवोद्यशिरोराध्यासन्देवयजनेपृथिव्या
मखायत्वामखस्यत्वाशीर्ष्णेस्वाहा इदंदेवीद्यावापृथिभ्यः ॐ देव्योवम्रोभूतस्यप्रथमजा
मखस्यवोद्यशिरोराध्यासन्देवयजनेपृथिव्याः मखायत्वामखस्यत्वाशीर्ष्णेस्वाहा २
इदंदेव्योवम्रोभूताय ॐ इद्रस्योजमखस्यवोद्यशिरोराध्यासन्देवयजनेपृथिव्या
मखायत्वामखस्यत्वाशीर्ष्णेस्वाहा ३ इदइद्रस्योजस्याय ॐ इयमग्नआसीन्मखस्यवो खट
द्यशिरोयत्सीन्मखवोद्यशिरोराध्यासन्देवयजनेपृथिव्याः मखायत्वामखस्यत्वा
शीर्ष्णेस्वाहा ४ इदइयत्याग्नये ॐ प्रैतुब्रह्मणस्पतिप्रदेव्येतुसूनृता अच्छावीरंनर्यंपं
क्तिराधसंदेवायज्ञंनयंतुनः मखायत्वामखस्यत्वाशीर्ष्णेस्वाहा ५ इदंप्रैतुब्रह्मणस्प
तये ॐ मखस्यशिरोसिमखायत्वामखस्यत्वाशीर्ष्णेस्वाहा ६ इदंमखस्यशिरसे १२
मखस्यशिरोसिमखायत्वामखस्यत्वा
शीर्ष्णे मखस्यशिरोसिमखायत्वामखस्यत्वाशी।

ॐ अश्वस्यत्वावृष्णःशक्नाधूपयामिदेवयजनेपृथिव्यामखायत्वामखस्यत्वाशी
र्ष्णेस्वाहा इदं अश्वस्यत्वाय ८ ॐ ब्रह्मयज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेन
आवःसबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवःस्वाहा इदंब्रह्म
णे ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदंसमूढमस्यपांसुरेस्वाहा इदंविष्णवे ।०
ॐ नमस्तेरुद्रमन्यवउतोतइषवेनमःबाहुभ्यामुततेनमःस्वाहा इदंरुद्राय ॐ य
मायत्वामखायत्वासूर्यस्यत्वातपसेदेवस्त्वामध्वानक्तुपृथिव्यास्संस्पृशस्पाहिअ
र्चिरसिशोचिरसितपोसिस्वाहा इदंयमाय अथपुरुषसूक्तेन ॐ सहस्रशीर्षापु
रुषःसहस्राक्षःसहस्रपातसभूमिंसर्वतस्पृत्वात्यतिष्ठद्दशांगुलंस्वाहा १ पुरु
षएवेदंसर्वंयद्भूतंयच्चभाव्यंउतामृतत्वस्येशानोयदन्नेनातिरोहतिस्वाहा २
एतावानस्यमहिमातोज्यायांश्चपुरुषःपादोस्यविश्वाभूतानित्रिपादस्यामृतंदिविस्वा०
त्रिपादूर्ध्वउदैत्पुरुषःपादस्येहाभवत्पुनःततोविश्वंव्यक्रामत्साशनानशनेअभिः

ना॰ १३ स्वाहा ४ ततो विराड्जायत विराजोऽअधिपूरुषः सजातोऽअत्यरिच्यत पश्चाद्भू
मिमथो पुरः स्वाहा ५ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं पशूंस्तांश्चक्रे
वायव्यानारण्याग्राम्याश्च ये स्वाहा ६ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि
जज्ञिरे छंदांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत स्वाहा ७ तस्मादश्वा
अजायंत ये के चोभयादतः गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजावयः स्वा॰
तं यज्ञं बर्हिषि प्रोक्षन् पुरुषं जातमग्रतः तेन देवा अयजंत साध्या ऋषय
श्च ये स्वाहा ९ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् मुखं किमस्यासी
त्किं बाहू किमूरू पादा उच्येते स्वाहा १० ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृ
तः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत स्वाहा ११ चंद्रमा मनसो
जातश्चक्षोः सूर्यो अजायत श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत १३

स्वाहा १२ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिर्दिशः
श्रोत्रात्तथा लोकाँ अकल्पयन् स्वाहा १३ यत्पुरुषेण हविषा देवा यज्ञमतन्वत व
सन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः स्वाहा १४ सप्तास्यासन् परिधयस्त्रिः स
प्त समिधः कृताः देवा यद्यज्ञं तन्वाना अवध्नं पुरुषं पशुं स्वाहा १५ यज्ञेन यज्ञमय
जन्त देवास्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः
सन्ति देवाः स्वाहा १६ इति पुरुषसूक्तैः स्वैस्वैर्मन्त्रेण गणेशनवग्रहदिक्पालानां होमः
पश्चात् लोमभ्यः स्वाहा इदं लोमभ्यः ॐ त्वचे स्वाहा इदं त्वचे ॐ लोहिताय स्वाहा
इदं लोहिताय ॐ मेदोभ्यः स्वाहा इदं मेदोभ्यः ॐ मांसेभ्यः स्वाहा इदं मांसेभ्यः ॐ
पायवे स्वाहा इदं पायवे ॐ स्नावभ्यः स्वाहा इदं स्नावभ्यः ॐ अस्थिभ्यः स्वाहा इदं
अस्थिभ्यः ॐ मज्जभ्यः स्वाहा इदं मज्जभ्यः ॐ रेतसे स्वाहा इदं रेतसे ॐ आपाना

ना०१८ यस्वाहा इदंअपाताय ॐ उद्यातायस्वाहा इदंउद्याताय ॐ विपातायस्वाहा इदंवि
पाताय ॐ सोचसेस्वाहा इदंसोचसे ॐ सोचमानायस्वाहा इदंसोचमानाय ॐ सो
चकायस्वाहा इदंसोचकाय ॐ तपसेस्वाहा इदंतपसे ॐ तप्यमानायस्वाहा इदं
तप्यमानाय ॐ तप्तायस्वाहा इदंतप्ताय ॐ तप्यसेस्वाहा इदंतप्यसे ॐ घर्मा
यस्वाहा इदंघर्माय ॐ निष्कृत्यैस्वाहा इदंनिष्कृत्यै ॐ प्रायश्चित्यैस्वाहा इदं
प्रायश्चित्यै ॐ भेषजायस्वाहा इदंभेषजाय ॐ यमायस्वाहा इदंयमाय ॐ
अंतकायस्वाहा इदंमन्तकाय ॐ मृत्यवेस्वाहा इदंमृत्यवे ॐ ब्रह्मणेस्वाहा इ
दंब्रह्मणे ॐ ब्रह्महत्यायस्वाहा इदंब्रह्महत्यायै ॐ द्यावापृथिवीभ्यांस्वाहा इ
दंद्यावापृथिवीभ्यां अतःपुरस्थाल्लीपाकेन द्वादशाहुतयः ॐ आवोदेवास ईम
हेवामंप्रयत्यध्वरे आवोदेवास आशिषोयज्ञियासोहवामहेस्वाहा १ ॐ दि १८

विष्णुर्मेकं कथं स्तज्जायते न छंदसा ततो निर्भक्तो यो स्मान्द्वेष्टि पंचवव पंक्तिष्मो नरिक्षे
विष्णुर्व्यक्रथं स्तत्रैष्टुभेन छंदसा ततो निर्भक्तो यो स्मान्द्वेष्टि पंचवव पंक्तिष्मो स्मान्नु
दस्येप्रतिष्ठापा अग्रगन्म स्वः सज्योतिषाभूम स्वाहा २ ॐ समर्द्धयः प्रतिहिताः शरीरे
सप्तरक्षंति सदमप्रमादं सप्तापः स्वपतो लोकमीयुस्तत्र जागृतो अस्वप्नजौ सत्रसा
दौ च देवौ स्वाहा ३ ॐ चत्वारिंशृंगास्त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासो अस्य त्रिधा
बद्धो वृषभो रौरवीति महो देवो मर्त्या आविवेश स्वाहा ४ ॐ तच्चक्षुर्देवहितं पुरस्ता
च्छुक्रमुच्चरत् पश्येम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतम बा० १
दीनाः स्याम शरदः शतं भूयश्च शरदः शतात् स्वाहा ५ ॐ आ तू न इन्द्र वृत्रहन्न
स्माकमर्द्धमागहि महान्महीभिरूतिभिः स्वाहा ६ ॐ धाम च्छदग्निरिन्द्रो ब्र
ह्मा देवो बृहस्पतिः सचेतसो विश्वेदेवा यज्ञं प्रावंतु नः शुभे स्वाहा ७ ॐ वि
ष्णो रराटमसि विष्णोः श्नप्त्रेस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि वैष्णवमसि

ना० २५ विस्रवे त्वा स्वाहा ॥ बौलिप्रप्रायश्चित्तक्रमे घृतग्गोपाः अदाभ्यः अग्नौ धर्मादि
धारयन् स्वाहा ॥ ॐ तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णो
र्यत्परमं पदं स्वाहा १ ॐ अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते
ॐ सोमाय स्वाहा इदं सोमाय घृतेनु होमः तत्व्याहृतयः ॐ भूः स्वा
हा इदमग्नये ॐ भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा इदं सूर्याय ॐ त्व
न्नोऽग्ने वरुणस्य विद्वान्देवस्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः
शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्निवरुणाभ्यां १ ॐ
स त्वन्नोऽग्नेऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अवयक्ष्व नो वरुणं
रराणो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्निवरुणाभ्यां २ ॐ
अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्वमित्वमया असि अयानो यज्ञं व २५

वहस्यापनोधेहिभेषजन्नथं स्वाहा इदमग्नये ॐ येतेशतंवरुणंयेसहस्रंयज्ञि
यापोशाविततामहांतः तेभिर्नोऽद्यसवितोतविष्णुर्विश्वेमुंचंतुमरुतः स्वाहा इ
इदंवरुणायपि०४ ॐ सवित्रेविष्णवेविश्वेभ्योमरुभ्यः स्वर्केभ्यः स्वाहा ॐ उदु
त्तमंवरुणपासेमस्मदवाधमंविमध्यमथं श्रथायअथवयमादित्यव्रतवा
नागसोअदितयेस्यामस्वाहा इदंवरुणायादितये ५ ॐ प्रजापतयेस्वाहा इदं
प्रजापतये जपदशांशहोमः ॐ अद्येत्यादि अमुकगोत्रस्यामुकप्रेतस्यदेहोद्धरणकामो
नारायणवल्यंगत्वेनब्राह्मणद्वारायतुगायत्रीपञ्चप्रधानदेवतानांजपकारितंतद्दशां
शहवनंतद्दशांशतर्पणंतद्दशांशमार्जनंच अनेनचरुणाकरणार्थमभिगंधाक्षतपुष्प
तांबूलपूगीफलदक्षिणादिवर्णद्रव्यैरमुकामुकगोत्रानअमुकामुकशर्मणोब्राह्मणान्पु
ष्मानहंवृणे हवनकर्तारः संकल्पकेषुः ॐ अद्यामुकगोत्रोहममुकशर्मा अमुकगोत्र
स्यामुकप्रेतस्यदेहोद्धरणकामोनारायणबल्यंगत्वेनपञ्चपत्री पञ्चप्रधानदेवतामंत्रा

अर्धान स्याज, स्या २)

ना॰१९ रणां जपीकृतं तद्दशांश हवनं तद्दशांश तर्पणं तद्दशांश मार्जनं चानेनच रुद्रगणहं करिष्ये
इति संकल्प्य: होमांते गृहपूजनं पक्कान्नेन फलदानं पक्कचूर्णं च घृतमधुतिलयुतपंच
पिंडान्निर्माप्य प्रथमं विष्णु केशाग्रे दद्यात् वेदीं कृपोत आसन संकल्प्य: अद्यामुकगो ॐ३
स्य● त्रं पितुरमुकप्रेतस्य देहोद्धरणकाम: वलिस्थाने इदमासनं विष्णवे नम: अवनेजनं
ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहोद्धरणकाम: पिंडस्थाने इदमवनेजनं
विष्णवे नम: ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहोद्धरणकामनया एष पिंड:
विष्णवे नम: ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहोद्धरणकाम: इदं प्रत्यव
नेजनं विष्णवे नम: पिंडोपरि गंधाक्षतपुष्पधूपदीपनैवेद्यतांबूलपूगफलानि दद्या
त् एवं कृत्वा द्वितीयम पिंड संकल्प्य: अपसव्येन मध्ये प्रेत पिंड संकल्प्य:
ॐ अद्यामुकगोत्रैं पितरमुकप्रेत इदमासनं ते मया दीयते नतवोपतिष्ठतां अद्या
मुकगोत्र पितुरमुकप्रेतस्य देहोद्धरणकाम: पिंडस्थाने मया दीयते नतवोपति १९

स्य२ स्य२

ष्ठतां अद्यामुकगोत्रपितरमुकप्रेतदेहोद्धरणकामः पिंडोपरि प्रत्यवने निक्षिप्ते मया
दीपने तवोपतिष्ठतां गंधादिदानं सव्यं अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं पु
होतारं रत्नधातमं वस्त्रं पिंडोपरि जलतिलांजलिं दद्यात् इदं विष्णुर्विचक्रमे इति मंत्रे
ण विष्णुपिंडोपरि दद्यात् नमस्ते इति रुद्रपिंडोपरि दद्यात् यमाय त्वेति मंत्रेण य
मपिंडोपरि जलांजलिं दद्यात् अपसव्येन नाम स्मरणेन प्रेतपिंडोपरि जलांतिलां
जलिं द० अथ द्वादशवासिकल्पः सव्यं अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहो
द्धरणकामः इदमासनं केशवाय नमः अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहोद्धर
णकामः इदमवनेजनं केशवाय नमः अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहोद्ध
रणकामः एष पिंडः केशवाय नमः अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहोद्ध
रणकामः इदं प्रत्यवनेजनं केशवाय नमः पिंडपूजनं अनेनैव क्रमेण नारा
यणाय नमः २ माधवाय नमः ३ गोविंदाय नमः ४ विष्णवे नमः ५ मधुसूदना

ना॰ ३१ यनमः ६ त्रिविक्रमायनमः ७ वामनायनमः ८ श्रीधरायनमः ९ हृषीकेशा
यनमः १० पद्मनाभायनमः ११ पुरुषोत्तमायनमः १२ पूर्ववदासनावनेजनपिंड
प्रत्यवनेजनपूजनं कृत्वा पश्चाद्विष्णुः प्रीयताम् अथ जले पिंडान् प्रक्षिपेत् ॐ
आवो देवास ईमहे वामं प्रयत्यध्वरे आवो देवास आशिषो यज्ञियासो हवामहे इ
ति मंत्रेण प्रथमं बलिं जले क्षिपेत् १ उपयामगृहीतोस्यादित्येभ्यस्त्वा विष्णु उरुगा
यैष ते सोमस्तं रक्षस्व मा त्वा दभन् २ इति मंत्रेण द्वितीयं बलिं जले क्षिपेत् ॐ
येना पावक चक्षुषा भुरण्यंतं जनाँ अनु त्वं वरुण पश्यसि इति तृतीयं ३ ये देवा
सो दिव्येकादश स्थ पृथिव्यामध्येकादश स्थ अप्सुक्षितो महिनैकादश स्थ ते देवा
सो यज्ञमिमं जुषध्वं ४ इति मंत्रेण चतुर्थं समुद्रं गच्छ स्वाहांतरिक्षं गच्छ स्वाहा दे
वं सवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाहोरात्रे गच्छ स्वाहा छंदां
सि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा
दिव्यं नभो गच्छ स्वाहाग्निं वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ दिवं ते ३१

धूमोगच्छतु स्वर्ज्योतिः पृथिवीं भस्मनापृण स्वाहा ५ इति मंत्रेण पंचमंत्र
लिं क्षिपेत् ॐ समुद्राय त्वा वाताय त्वा स्वाहा सरिताय त्वा वाताय स्वाहा अना
धृष्याय त्वा वाताय स्वाहा प्रतिधृष्याय त्वा वाताय त्वा स्वाहा प्रतिधृष्याय
त्वा वाताय स्वाहा अवस्यवे त्वा वाताय स्वाहा शिमिदाय त्वा वाताय स्वाहा इ
ति षष्ठ बलिं जले क्षिपेत् ६ ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योति
र्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा सूर्यो ज्योतिः स्वाहा ७ इ
ति सप्तमं बलिं हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीत्
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम इत्यष्टमं बलिं
ॐ ये त्वो पर्यपवत्स्य देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आ
प्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा मा व स्तेन ईशा
त माघशंसो ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून्

ना०
१८ नृपाहि इति नवमं ९ ॐ यज्जाग्रतो दूरमुदैति दैवं तदुसुप्तस्य तथैवैति दूरंग
मं ज्योतिषां ज्योतिरेकं तन्मे मनः शिवसंकल्पमस्तु इति दशमं १० ॐ याः
फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः वृहस्पतिप्रसूतास्तानो मुंचत्व
ंहसः इत्येकादशम् ११ ॐ विष्णुर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि वि
ममे रजांसि यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायो
विष्णवे त्वा ॐ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे इंद्रस्य युज्यः सखा
स्वाहा इति द्वादशं बलिं प्रक्षिपेत् १२ रुद्राध्यायं जपेत् हवनकर्त्तारः
तर्पणं मार्जनं च कृत्वा पश्चात् दशदिक्पालपूजनं कुर्यात् पूर्वस्यां
दिशि इंद्राय नमः भो इंद्र इहं इहाधिमाव बलिं भक्ष २ मां सकुटुंबं सप
रिवारं रक्ष २ आयुःकर्त्ता क्षेमकर्त्ता शांतिकर्त्ता वरदो भव एवं अग्निको
णे अग्नये नमः दक्षिणस्यां यमाय नमः नैरृत्यकोणे निरृतये १८

नमः पश्चिमे वरुणाय नमः वायव्यकोणे वायवे नमः उत्तरे कुवेराय नमः
ईशान्ये महादेवाय नमः ईशानपूर्वमध्ये ब्रह्मणे नमः नैरृत्य पश्चिममध्ये
अनन्ताय नमः अथ क्षेत्रपाल पूजा करकलितकपालः कुण्डली दण्डपाणि
स्तरुणतिमिरनीलव्यालयज्ञोपवीती क्रतुसमयसपर्याविघ्नविच्छेदहे
तुर्जयति वटुकनाथः सिद्धिदः साधकानां १ ओं क्षेत्रपाल इमं दधिमाषव
लिं भक्ष २ मांस कुटुंबं सपरिवारं रक्ष २ आयुः कर्त्ता क्षेमकर्त्ता कल्याणक
र्त्ता वरदो भव गोदान संकल्पः अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य देहोद्ध
रणकामो नारायणवलिकर्म सांगता सिद्ध्यर्थं गोदान जन्य फलप्राप्तये
गो सं। वृषिनीं दक्षिणां यथानाम गोत्राय ब्राह्मणाय दातुमहमुत्सृजे अथ
घट संकल्पः अपसव्येन प्रेतघट संकल्पः अद्यामुकगोत्रस्य पितुः प्रेत
देहोद्धरणकामः सौम प्रतिमाघलंकार सहितां पंघट तिलपात्र दीपतैलवो
पानिषछत्रं अद्यामुकगोत्रस्य पितुरमुक प्रेतस्य देहोद्धरणकामो ब्राह्म

ना.१९

णोरजितप्रतिमाघं ऽलंकारसहितं इमं कुंभं विष्णुप्रसन्नार्थं यथानामगोत्राय

पुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे ॥ अनेनैव क्रमेण विष्णुरूपम

प्रेतस्य इदं संकल्पः अद्यामुकगोत्रस्यामुकप्रेतदेहोद्धरणकामनया मम लोहप्रति

माघं ऽलंकारसहितं इमं कुंभं यमप्रसन्नार्थं यथानामगोत्राय ब्राह्मणाय तु

भ्यमहं संप्रददे ॥ अथ पूर्णपात्रसंकल्पः कृतैतन्नारायणबलिहोमकर्मणि

कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थं इदं तण्डुलपूर्णपात्रं प्रजापति

दैवतं यथानामगोत्राय ब्राह्मणाय तुभ्यमहं संप्रददे ॥ अथ पूर्णाहुतिः पूर्णाद

र्वि परापत सुपूर्णा पुनरापत वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो स्वाहा ॥ मंत्र

पाठः प्रार्थयेत् अतसीपुष्पसंकाशं पीतवाससमच्युतं ये नमस्यन्ति गोविंदं

न तेषां विद्यते भयम् अनादिनिधनं देवः शंखचक्रगदाधरः अक्षयपुं

डरीकाक्ष प्रेतमोक्षप्रदो भव ॥ प्रणिपत्य विसर्जनं ॥ इति नारायणबलिपद्धतिः ॥ १८